International Journal of Sanskrit Research 2023; 9(6): 74-76

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 74-76
© 2023 IJSR
www.anantaajournal.com
Received: 08-09-2023
Accepted: 12-10-2023

**Dr. Sreegith TG**
Assistant Professor,
Depatment of Sanskrit,
KSMDB College, Sasthamcotta,
Kollam, Kerala, India

**Corresponding Author:**
**Dr. Sreegith TG**
Assistant Professor,
Depatment of Sanskrit,
KSMDB College, Sasthamcotta,
Kollam, Kerala, India

# केनकठोपनिषदोः संवादप्रणाल्या आत्मतत्त्वप्रतिपादनम्

**Dr. Sreegith TG**

**सारांश**
आत्मतत्त्वस्य दुर्विज्ञेयत्वात् तदुद्बोधने बहुविधोपायाः स्वीकृतास्सन्ति उपनिषत्सु। क्वचिदाख्यायिकामुपजीव्य आत्मतत्त्वस्य वर्णनं क्रियते, क्वचित् उपदेशरूपेण अन्यत्र संवादमाश्रित्य च क्रियते। सर्वैरप्युपायविशेषैः आत्मनः दुर्ग्रहत्वमतिक्रम्य सुग्रहत्वं सम्पद्यत एव। तत्र च उपनिषत्सु आत्मप्रतिपादनार्थं संवादप्रणाली या उपयुक्ता वर्तते साचात्र विचार्यते। तत्र च केनकठोपनिषदोः विद्यमानसंवाद एवात्र विचारार्थं स्वीक्रियते। केनेषितमित्यादि प्रश्नेनैव केनोपनिषदारभ्यते। तेषां प्रश्नानां समाधानमाचार्यैरुच्यते च। एवञ्च गुरुशिष्यसंवादेनात्र आत्मतत्त्वोपदेशः क्रियते। यमनचिकेतसोः संवादमुखेनैव कठिपनिषदि रहस्यभूताया आत्मविद्यायाः उपदेशः क्रियते।

**कूटशब्दः** ब्रह्म, चक्षुषश्चक्षुः, श्रोत्रस्य श्रोत्रम्, प्राणस्य प्राणः, वरत्रयम्, आत्मा, जगत्, अमृतत्वम्, वीर्यम्, मृत्यदेवः, वित्तम्, भोगः, यमः, नचिकेताः

**प्रस्तावना**
अस्याः केनेषितमित्यपि नामान्तरमस्ति। तलवकारोपनिषदित्यप्यस्ति प्रथा। पदवाक्यभेदेन शङ्कराचार्यः द्विविधं भाष्यं कृतवानत्र। ओं आप्यायन्तु ममाङ्गानि प्राणश्चक्षुः श्रोत्रमित्यादिना मङ्गलशलोकेनेयमारभ्यते। सामवेदान्तर्गतस्य तलवाकारब्राह्मणस्य भागो भवतीयमुपनिषत्। अत एवास्याः तलवकारोपिनिषदिति प्रथा प्राप्ता। केनेषितं पतिति प्रेषितं मन इति प्रथममन्त्र आरभ्यते। तेनैव कारणेन केनोपनिषदिति नाम सम्पन्नम्। ब्रह्मौत्मैक्यविद्याया उपदेशो भवतीह प्रतिपाद्यविषयः। सा च यथोक्तकर्मभिः शुद्धचित्तस्य कृते उपदिशयते। चतुस्त्रिंशत् मन्त्राः चतुर्ष्वध्यायेषु विभक्ताः वर्तन्ते इह। प्रथमाध्यायद्वयं पद्यात्मकं पश्चात् गद्यात्मकञ्च भवतः। पद्यं गुरुशिाष्यसंवादरूपेण भवति। स एवेह सङ्गृह्यते।

केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।
केनेषितां वाचमिमां वदन्ति चक्षुःश्रोत्रं क उ देवो युनक्ति ।।[1]

अनेन प्रश्नात्मकमन्त्रेण ग्रन्थोऽयमारभ्यते। अन्तःकरणं प्राणादयश्च कस्य शाक्त्या [2] प्रवर्तन्तेति प्रश्नस्याशयः। अन्तःकरणाद्यचेतनपदार्थानां प्रवृत्तिरूपलिङ्गेन विशेषार्थः प्रश्नो उपपन्नो भवति। यतः रथादीनामचेतनानां प्रवृत्तिः चेतनाधिष्ठितेति लोके प्रसिद्धम्। मन आदीनां अचेतनानां प्रवृत्तिस्तु दृश्यते। तद्धि लिङ्गं भवति चेतनवतः कस्यचिदधिष्ठातुरस्तित्वे। एवञ्च कस्येच्छामात्रेण मन आदीनि स्वविषयं प्रति गच्छतीति केनेषितमित्यस्यार्थः लभ्यते। इत्थं पृष्टवते योग्याय शिाष्यायाह गुरुः।

श्रोत्रस्य श्रोत्रं मनसो मनो यत् वाचो ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।। इति।।[3]

केनेषितं पतति प्रेषितं मन इत्यादिप्रश्नस्य तन्नियन्ता क इति साक्षादुत्तरे वक्तव्ये श्रोत्रस्य श्रोत्रमिति प्रतिवचनमयुक्तमिति शङ्क्यते। नायं दोषः। यतो हि सर्वस्यापि कारणस्य नास्ति कश्चिद्विशेषः। तस्यान्यथा विशेषानवगमादिति भाष्ये। तेन च आत्मनः निर्विशेषत्वमपि प्रतिपादितम्। अपि च निर्विशेषस्यात्मनः विक्रियाराहित्येऽपि मन आदीनां विक्रियासम्पादने नास्ति क्लेशा इति ज्ञाप्यते श्रोत्रस्य श्रोत्रमित्यनेन।

---

[1] केनोपनिषत् 1.1
[2] अथ केन प्रयोक्तोःयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः।। भगवद्गीता 3.36
[3] केनोपनिषत् 1.2

श्रोत्रस्य श्रोत्रमित्यत्र श्रोत्रत्वं नाम शब्दावभासकत्वमित्यर्थः ग्राह्यः। तच्च न स्वतः सम्भवति विना चेतनम्। यच्छ्रोत्रस्योपलब्धृत्वेनावभासकत्वं तदात्मनिमित्तत्वाच्छ्रोत्रस्य श्रोत्रमित्युच्यते। श्रोत्रं स्वविषयव्यञ्जनसमर्थं भवति। तच्च श्रोत्रस्य चौतन्ये ह्यात्मनि सत्येव सम्भवति नत्वसति। तथा च श्रुत्यन्तराणि–आत्मनैवायं ज्योतिषास्ते[4], तस्य भासा सर्वमिदं विभाति[5],

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्[6]।

प्रकृते बुद्धिमनसी च एकीकृत्य मनस इति निर्देशो भवति। प्राणग्रहणेनैव घ्राणस्य ग्रहणं चिन्तितमिति मन्तव्यम्। एवञ्च समस्तस्य करणकलापस्य यदर्थप्रयुक्ता प्रवृत्तिरस्ति तद्ब्रह्मेति प्रकरणार्थो ग्राह्यः। चक्षुषश्चक्षुरित्यनेन रूपप्रकाशकस्य चक्षुषः यत्सामर्थ्यमस्ति तत्तु चैतन्यस्यैवेति ज्ञेयम्। यथोक्तमात्मानं ज्ञात्वा सर्वे अमृताः भवन्ति। संसारान्मुच्यमानाः धीमन्तः अस्माच्छरीरात् वियुज्य शारीरान्तरस्य प्राप्त्यसम्भवात् अमृताः भवन्ति। अज्ञाने सति कर्माणि शारीरान्तरं प्रतिसन्धत्ते। आत्मावबोधे तु अमरणधर्माणो भवन्ति। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानाशुः।[7] श्रोत्रस्य श्रोत्रस्य आत्मनः दुर्ग्राह्यत्वं बोध्यते द्वितीयेन मन्त्रेण।

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः
न विद्मो न विजानीमो यथैतदनुशिष्यात्।
अन्यदेव तद्विदितादथो अविदितादधि
इति शुश्रुम पूर्वेषां ये नस्तद्विद्यादचचक्षिरे ।।[8]

श्रोत्रस्य श्रोत्रं आत्मा न श्रोत्रादिभिरिन्द्रियैः ज्ञातुं शक्यते। वागिन्द्रियेण व्याख्यातुमपि न शक्यते। न स सङ्कल्पविषयः निश्चयस्य विषयो वा भवति। इन्द्रियमनोभ्यां हि भवति पदार्थस्य ज्ञानम्। यद्धि करणानां विषयो भवति तस्यैवान्येभ्यो बोधनं कर्तुं शक्यते जातिगुणक्रियाविशेषैः नान्यस्य। न तत् ब्रह्म जात्यादियुक्तमित्यतः शिष्यायोपदेष्टुं विषम एव। अत एव श्रुतिः कथयति न विद्मो न विजानीमो इति। विदिताविदिताद्भिन्नमेव सर्वस्यापि कारणभूतम्। यद्विदितमस्ति तदशुद्धमल्पञ्च भवति। तद्भिन्नं तु शुद्धं भूमा च भवति। विदितस्य सर्वस्यापि शुद्धत्वाद् अल्पत्वाद्दुःखरूपत्वाच्च उपेक्षणीयमेव भवति। विदिताद्भिन्नं अनुपेक्षणीयमिति लभ्यते।
नहि स्वात्मनो भिन्नस्य विदिताविदिताभ्यां अन्यत्वं वस्तुन सम्भवतीति कारणात् आत्मैव ब्रह्मेति लभ्यते। तथा च श्रुतिः य आत्मापहतपाप्मा[9] इति। सर्वविशेषरहितस्यात्मनः आचार्योपदेशपरम्परया एव प्राप्तत्वमस्ति। तस्य तर्कतः प्रवचनमेधाबहुश्रुततपोयज्ञादिभिश्च [10] प्राप्तिर्नास्ति।

यद्वाचानभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।।[11]

[12] वाचा वक्तुं न शक्यते। किन्तु येन वाक् प्रकाश्यते तत् ब्रह्मेति ज्ञेयम्। उक्तं च केनेषितां वाचमिमां वदन्ति यद्वाचो ह वाचमिति। पश्चात् मनसः अविषयत्वं यन्मनसा न मनुतेत्यनेन प्रतिपाद्यते। एवं चक्षुराद्यविषयत्वमपि ब्रह्मणः प्रतिपाद्यते। एवं यथोक्तहेयोपादेयविपरीततत्वादात्मा ब्रह्मेति बोधितः शिष्यः स्वयमहमेव ब्रह्मेति सम्यग्वेदाहमिति गृह्णीयादित्याशयात् शिष्यबुद्धिविचालनायाहाचार्यः

यदि मन्यसे सुवेदेति दहरमेवापि नूनम्
त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वम्।[13]

शिष्यः यदि ब्रूयात् सुष्ठु वेदाहं ब्रह्मेति तु इष्टापत्तिरेव खल्विति शङ्का न कार्या। तन्न निश्चितं ज्ञानं यदहं सम्यग्वेदेति। अग्निः पदार्थान्तरं दहति नतु स्वात्मानं स्वरूपम्। स्वभिन्नं वेद्यं वस्तु सुष्ठु ज्ञातुं शक्यते नतु स्वात्मानम्। स्वयं स्वस्यैव वेत्ता कथं भवति? सर्वस्य वेदितुः स्वात्मा ब्रह्मेति सुनिश्चितार्थः। श्रोत्रादिभिः अवगन्तुमशक्यत्वं विदिताविदितादन्यत्वञ्चोक्त्वा आत्मनः पुनः सुष्ठु वेदाहमिति प्रयोग असाधुरेवेति कारणात् शिष्यस्य सुवेदेति बुद्धिनिराकरणं युक्तमेव। तदुक्तं श्रुत्या [14] यदि मन्यसे सुवेदेति दहरमेवापि नूनम् इति।
ततश्च एकान्ते उपविश्य आचार्योक्तवचनं सम्यग्विचिन्त्य गुरुमुपसङ्गम्याह शिष्यः नाहं मन्ये सुवेदेति। तत्र गुरूणां वचनमस्ति तदसम्भवमेव। यतो हि पूर्वं ज्ञातमित्युक्तमिदानीं न ज्ञातमिति कथनात् वैषम्यं प्राप्तम्। ज्ञातं चेत् अज्ञातमिति वक्तुं न शक्यते। अज्ञातं चेत् ज्ञातमित्यपि वक्तुं न शक्यते। अतः न सुवेदेति शिष्यस्य वचनमयुक्तम्। श्रुतिः स्वतन्त्रतया सर्वस्यापि समाधानं ब्रूते

यस्यामतं तस्य मतं मतं यस्य न वेद सः इति।[15]

यस्य विविदिषाप्रयुक्तप्रवृत्तस्य साधकस्य अविदितं ब्रह्मेति आत्मतत्त्वनिश्चयफलावसानावबोधतया विविदिषा निवृत्ता इत्यभिप्रायः तस्य ब्रह्म विदितमित्यर्थः। यस्य तु मया ब्रह्म ज्ञातमित्यभिप्रायोऽस्ति स मिथ्यादर्शी विपरीतविज्ञानो विदितादन्यत्वाद्ब्रह्मणो न वेद सः। अनेन सिद्धं हि अवैदिकज्ञानस्य मिथ्यात्वम्। स एव परमार्थतो ब्रह्मज्ञानी यो ब्रह्म अवेद्यं नतु वेद्यमिति निश्चनोति। यो स्वयं ब्रह्मज्ञानीति मनुते स अविद्वानेव। यो तद्विपरीतेन मनुते स विद्वानेव। आत्मा साक्षाद्बोध एवेत्युपदिशयते।

प्रतिबोधविदितं मतममृतत्वं हि विन्दते। आत्मना विन्दते वीर्यं
विद्यया विन्दतेऽमृतम्।। इति।।[16]

बोधशब्देन बौद्धाः प्रत्यया गृह्यन्ते। सर्वप्रत्ययदर्शी चिच्छक्तिस्वरूपमात्रः प्रत्ययैरेव प्रत्ययेष्वविशिष्टतया लक्ष्यते। अतः प्रत्ययप्रत्यगात्मतया विदितं ब्रह्म यदा तदा तन्मतं तत् सम्यग्दर्शनमित्यर्थः। यथोक्तप्रकारेण योथोक्तलक्षणमात्मानं यो जानाति तस्य तर्हि मनुष्यजन्मनि सार्थकता भवति। नो चेत् महती विनष्टिर्भवति। तथा च श्रुतिः इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः। इति।[17]

### कठोपनिषत्

बहुभिः इष्यमाणेयमुपनिषत् अतीव प्रसिद्धा भवति। कृष्णयजुर्वेदस्य कठशाखायाः तैत्तिरीयब्राह्मणे अन्तर्भवतीयम्। कठशाखायां विद्यमानत्वादेव कठमिति नाम प्राप्तमिति ज्ञेयम्। यमनचिकेतसोः संवादद्वारा आत्मविद्या सम्यक् प्रतिपाद्यते इह।

---

[4] बृहदारण्यकोपनिषत्. 4.3.6
[5] कठोपनिषत्. 2.2.15
[6] भगवद्गीता 15.12
[7] कैवल्योपनिषत् 1.2
[8] केनोपनिषत् 1.3.4
[9] छान्दोक्योपनिषत् 8.7.1
[10] श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोपि बहवो यं न विद्युः।
आश्चर्यो वक्ता कुशलोस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः।। (कठोपनिषत्. 1. 2.7)
मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।। (भगवद्गीता 7.3)
[11] केनोपनिषत् 1.5
[12] यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। (तैत्तिरीयोपनिषत् 2.9)
नैव वाचा मनसा प्राप्तुं शक्यो न चक्षुषा। (कठोपनिषत् 2.3.12)
[13] केनोपनिषत् 1.2.1
[14] केनोपनिषत् 2.2
[15] केनोपनिषत् 1.2.3
[16] केनोपनिषत् 1.2.4
[17] केनोपनिषत् 1.2.5

वाजश्रवसः पुत्रेण गौतमेन विश्वजिन्नामकयागः कृतः। सर्वस्वदानं भवति यागस्याऽस्य मुख्यांशः। गौतमेन स्वीयाः गावः दानरूपेण प्रदत्ताः। गोदानं श्रद्धया वीक्षमाणेन तत्पुत्रेण नचिकेतसा चिन्तितं यत् दानरूपेण दीयमानाः गावः निरिन्द्रियादिभः अत्यन्तमसमर्थाः भवन्तीतिकारणात् स्वपिता पापमवाप्नोतीति। ततः स रक्षणीय इति। पितुः सर्वस्वे ममाप्यन्तर्भावो वर्तते। अतः कस्मै मां दास्यसीति वारं वारं पितरं गौतमं पृष्टवान् नचिकेताः। तत्र कोपेन मृत्यवे त्वां ददामीति पित्रा उक्तम्। पश्चात् स्वाविवेकं ज्ञात्वा पिता बहुदुःखितवान्। किन्तु बालकः नचिकेताः स्वपितृप्रतिज्ञापालनार्थं यमलोकं गच्छति। तत्र यमस्याभावे दिनत्रयं उषित्वा प्रतीक्षां कृतवान्। प्रत्यागत्य नचिकेतवृत्तान्तं ज्ञात्वा बहु तुष्टिमकरोद्यमः। तुष्ट्या वरत्रयं दातुमुद्युग्धः। तत्र [18] प्रथमवरत्वेन यदाऽहं इतः प्रतिनिवृत्य स्वगेहं प्राप्नोमि तदा पिता मां प्रत्यभिजानीयात् इति पृष्टम्। [19] द्वितीयत्वेन स्वर्गप्राप्त्युपायभूतामग्निविद्यां पृष्टवान्। [20] अन्तिमेन तृतीयेन वरेण आत्मविद्याञ्च पृष्टवान्। तदा एव आत्मविद्यायाः महत्तरा चर्चा प्रारभ्यते। बहुविधपरीक्षां कृत्वैव दुष्कराम् आत्मविद्यारहस्यं यमः नचिकेतसमुपदिष्टवान्। ग्रन्थोऽयं वल्लीत्रयात्मकेन अध्यायद्वयेन विभक्तो वर्तते।

**वरत्रयविचारः**

तस्मात् प्रति त्रीन् वरान् वृणीष्व इति यमस्य वचनम्। वरत्रयं क्रमेण नचिकेताः प्राप्तवान्। आद्यवरद्वयमपि अनायासेन यमः दत्तवान्। तृतीयन्तु तथा दातुं स न प्रयत्नं कृतवान्, अपि तु ततः नाचिकेतान्तःकरणं विचालितवान्। यतो हि तृतीयत्वेन वरेण आत्मविद्या एव नचिकेतसा प्रर्थिता। सा च अतीव रहस्यभूता भवति। समर्थेभ्यः अधिकारिभ्य एव दातव्या विद्येयम्। अतः बालकस्य सामर्थ्यं परीक्षितुं निश्चिन्वन् यमः वरान्तरं प्रष्टुं प्रचोदितवान्। देवैरपि आत्मविद्याविषये पुरा विचिकित्सितमस्तीति यमेन सूचितम्। तत्र बालकस्य वचनमस्ति यद् देवैरपि विचिकित्सितं यत्र तत् मां प्रतिबोधयेति। अपि च विषयेस्मिन् त्वदन्यः कश्चन समर्थः वक्ता दुर्लभ एव। तच्छ्रुत्वा मृत्युदेवः पुनस्तस्मै मोहमुत्पादितवान्। तथा च

> शातायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान्।
> भूमेर्महदायतनं वृणीष्व स्वयं जीव शारदो यावदिच्छसि ।। इति।।[21]
> तदूर्ध्वमेवं कथयति– एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च।
> महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि।। इति।।[22]
> ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामांश्चन्दतः प्रार्थयस्व।
> इमा रामाः सरथाः सतूर्याः नहीदृशाः लम्भनीया मनुष्यैः
> आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः।। इति।।[23]

सन्दर्भेस्मिन् नचिकेतसः स्ववचने यावत् दार्ढ्यमस्तीत्यवगन्तुं शक्यते। नचिकेताः कथयति त्वया उपन्यस्ताः सर्वे भोगाः नश्यन्त्येव। नश्वरे विषये न मे मतिरस्ति। अपि च भोगोऽयं मनुष्याणां सर्वेन्द्रियाणां तेजः अपक्षयन्ति। अत एता अनर्थकरा एव। ब्रह्मणः अपि आयुरल्प एव तत्र मनुष्याणां का गतिरिति ऊहनीया एव। अतः दीर्घजीविकेन न कोऽपि लाभोऽस्ति। सर्वो ह्युपर्येव बुभूषति लोकस्तस्मान्न पुत्रवित्तादिलोभैः प्रलोभ्योऽहम्। एवं वित्तेन मनुष्यः तर्पणीयो न भवति। मम तु आत्मज्ञानमेवापेक्षते। नचिकेतसं परीक्ष्य तस्य सामर्थ्ये तृप्तः यमः तस्मै आत्मज्ञानमुपदिशाति। तथा च

> अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः।
> तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते।।इति।।[24]

**उपसंहारः**

उपनिषत्सु आत्मप्रबोधनार्थं स्वीकृतं संवादात्कमकोपायं स्वीकृत्य प्रबन्धेस्मिन् विचारः प्रस्तुतः। तत्र मुख्यतया केनोपनिषदि तथा कठोपनिषदि विद्यमानाः संवादाः स्वीकृताः। केनोपनिषदि गुरुशिष्यसंवादरूपेण आत्मविचारः प्रस्तुतः। कठे तावत् यमनचिकेतसोः संवादरूपेण आत्मतत्त्वस्य वर्णनं कृतमस्ति। उभयत्रापि ग्रन्थे आत्मा इति एकस्यैव प्रतिपादनं क्रियते इति तु सत्यमेव किन्तु प्रतिपादनार्थं स्वीकृता शैली भिन्ना वर्तते। अतः लोकानां भिन्नरुचिरस्तीति कारणात् स्वस्य कृते अनुगुणां विचारशैलीं स्वीकृत्य आत्मावगमने प्रयत्नः कर्तुं शक्यते। केनोपनिषदि ब्रह्मात्मैक्यविद्यायाः प्रतिपादनं मुख्यतया लक्ष्यते। ब्रह्म च विदिताद् अविदिताच्च भिन्नमिति वर्ण्यते। एवमेव साक्षात्ब्रह्मणः बोधनापेक्षया श्रोत्रस्य श्रोत्रमित्यादिरूपेण बोधनं क्रियते। पुत्रपौत्रहिरण्याश्वादि ये भोगविषयाः सन्ति तत्सर्वं ब्रह्मविद्याफलापेक्षया तुच्छमेवेति अवगम्यते कठोपनिषदि। अतः श्रेयःप्रेयसोर्मध्ये श्रेयोर्थिनां सद्गतिर्भवति प्रेयोर्थिनां दुर्गतिश्च भवतीति विवच्यते।

**अनुशीलितग्रन्थसूची**


1. केनोपनिषत्–गीताप्रेस,गोरखपुर– 1995
2. कठोपनिषत्–गीताप्रेस,गोरखपुर– 1999
3. कैवल्योपनिषत्–चौखम्बा विद्याभवन– 1998
4. छान्दोक्योपनिषत्–गीताप्रेस,गोरखपुर– 2000
5. बृहदारण्यकोपनिषत्–गीताप्रेस,गोरखपुर– 2000
6. तैत्तिरीयोपनिषत्–गीताप्रेस,गोरखपुर– 1998
7. भगवद्गीता –गीताप्रेस,गोरखपुर– 1997


[18] शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युः गौतमो माभिमृत्यो।
त्वत्प्रसृष्ट माभिवदेत् प्रतीत एतत् त्रयाणां प्रथमं वरं वृणे।। (कठोपनिषत् 1.1.10)

[19] सत्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्धधानाय मह्यम्।
स्वर्गलोका अमृतत्वं भजन्ते एतद्वितीयेन वरेण वृणे।। (कठोपनिषत् 1.1.13)

[20] येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चौके।
एतद्विद्यमनुशिष्टस्त्वयाहम् वराणामेष वरस्तृतीयः।। इति।। (कठोपनिषत् 1.20)

[21] कठोपनिषत् 1.1.23

[22] कठोपनिषत् 1.1.24

[23] कठोपनिषत् 1.1.25

[24] कठोपनिषत् 1.2.1